चिदानन्दस्तवराजः

४५२५

4525

F. = 2

॥ ॥ अथचिदानंदस्तवराजप्रारंभः॥ ॥ १८

चि॰नं॰ १

ग॰
श्रीगणेशायनमः॥ नतदानैवबालोयुवाभोगलोलस्तथानैववृद्धःसमासन्न
कालः॥ नवासाधुशीलोप्ययासाधुशीलःश्चिदानंदसिंधौयदाहंनिमग्नः
॥१॥नतदानैवजीवःशिवोनापिकर्त्तानतथानैवभोक्तानभर्त्तानुमंता॥नथा
नोविरिंचिर्नविष्णुर्नरुद्रःश्चिदानंदसिंधौयदाहंनिमग्नः॥२॥नतदानापिब
द्धोनमुक्तोविरागीनरागीनसंगीतथानोविभोगी॥नयोगीनभोगीनसं
साररोगीश्चिदानंदसिंधौयदाहंनिमग्नः॥३॥नतदानैवजाग्रत्सुषुप्तिर्नचा
स्तेनचास्वप्नएषातुरीयापिकाचित्तंनवाचोन्मनीनोगतायानना श्रीश्चि राम १

दानंदसिंधौयदाहंनिमग्नः॥४॥तदानैवसूक्ष्मंमहास्थूलमेकंनचाजंगा
मीजगमंनापिकिंचित्॥नकर्माप्यधर्मोनधर्मोनकश्चिच्चिदानंदसिंधौ
यदाहंनिमग्नः॥५॥तदाकामिनीनैवकामीनकामोनवाक्लीबमस्मान
वर्णाश्रमादि॥नवाशिष्यमार्गोगुरुर्वानचास्तेश्चिदानंदसिंधौयदाहं
निमग्नः॥६॥तदानासनंप्राणरोधोनिरोधोनवाकारकानांतथाधार
णानो॥नवाध्यानमेकंसमाधिर्नकश्चिच्चिदानंदसिंधौयदाहंनिम
ग्नः॥७॥तदानाप्यभेदोनभेदोनबोधोनचाबोधएषोविनोदोनखेदः

चि॰नं॰ २

2

अहोनोमुकुंदोनचानंदकंदश्चिदानंदसिंधौयदाहंनिमग्नः॥८॥तदानस्मृ
तिर्विस्मृतिर्मेविहीनोतदानांतरंसाधकोनापिसिद्धः॥असिद्धोनशुद्धोन
चाशुद्धएषश्चिदानंदसिंधौयदाहन्निमग्नः॥९॥तदानैवतूष्णीमतूष्णींन
किंचिन्नवाकिंचिदेवेतिकोटिद्वयंनः॥यथावत्स्थितोहंतथैवास्मिसि
द्धःश्चिदानंदसिंधौयदाहन्निमग्नः॥१०॥दशश्लोकीचिदानंदनामकांवि
त्प्रकाशिकां॥योहिनित्यंपठेत्सत्यंसहजानंदमाप्नुयात्॥११॥इतिश्रीम
त्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितंदशश्लोकीचिदानंद